# Ananda Mandakini

# આનન્દમન્દાકિની

## Document Information

Text title : AnandamandAkinI

File name : AnandamandAkinI.itx

Category : shataka, major_works, madhusUdanasarasvatI

Location : doc_z_misc_major_works

Author : Madhusudana Sarasvati

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, PSA Easwaran

Description/comments : A unique devotional poem by an Advaita philosopher

Latest update : January 31, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# આનન્દમન્દાકિની

શ્રીમધુસૂદનસરસ્વતીવિરચિતા
આનન્દમન્દાકિની ।

વાગ્દેવીચતુરાસ્યપઞ્ચવદના નિત્યં સહસ્રાનનો-
ઽપ્યુચ્ચૈર્યત્ર જડાત્મતામુપગતાઃ કેઽન્યે વરાકાઃ સુરાઃ ।
મર્ત્યાઃ સ્વલ્પધિયઃ કથં નુ કુશલાસ્તત્રાપ્યહં પ્રજ્ઞયા
હીનઃ કિં કરવાણિ તાં વ્રજકુલોત્તંસ પ્રશંસાં તવ ॥ ૧॥

નિત્યં બ્રહ્મસુરેન્દ્રશઙ્કરમુખૈર્દત્તોપહારાય તે
વિસ્વાદાંસ્તુષમિશ્રતણ્ડુલકણાન્વિપ્રઃ સુદામા દદૌ ।
તદ્વદ્દેવ નિરર્થકૈઃ કતિપયૈ રૂક્ષાક્ષરૈર્નિર્મિતાં
વાગીશપ્રમુખસ્તુતસ્ય ભવતઃ કુર્યાં સ્તુતિં નિસ્ત્રપઃ ॥ ૨॥

શશ્વદ્બ્રહ્મશિવેન્દ્રદેવગુરુવાગ્દેવીફણીન્દ્રાદિભિઃ
સ્તુત્યસ્યાપિ હરે મમાસ્તુ રચિતા વાણી વિનોદાય તે ।
ચિત્રાલઙ્કૃતિશાલિભિઃ સુલલિતૈર્નિત્યં કવીનાં સ્તવૈઃ
સમ્રાજઃ સમુપાસિતસ્ય શુકગીર્ધત્તે પ્રમોદં યથા ॥ ૩॥

ચિત્રાકારકિરીટકોટિવિલસદ્રત્નૌઘકાન્તિચ્છટા-
સઙ્ઘટ્ટેન વિચિત્રમમ્બરતલં કુર્વત્સ્થિતં મૂર્ધનિ ।
જીયાત્કેકિશિખણ્ડમણ્ડનમિદં નીલાચલસ્થાયિની
સ્વર્ણાદ્રિઃ શિખરે પુરન્દરધનુર્વ્યૂહસ્ય નિન્દાવહમ્ ॥ ૪॥

યત્પાદાન્તનખાંશુચિન્તનવશાદજ્ઞાનમન્ધં તમો-
ઽપ્યન્તં યાતિ મુકુન્દ તસ્ય ભવતો ધ્વાન્તાનિ કિં મૂર્ધનિ ।
જ્ઞાતં ત્વાં દયિતં સમેત્યજલદા યે કેશતામાશ્રિતા-
સ્તે બદ્ધાશ્ચપલાગણૈઃ પ્રણયજક્રોધાત્કિરીટચ્છલાત્ ॥ ૫॥

ત્વચ્ચક્ષુઃ સવિતુઃ સરોરુહરુચેઃ સાક્ષાત્કથં ગણ્ડયો-
ર્ભાલે ચ વ્રજનાથ નર્તનપરા ધ્વાન્તાર્ભકાઃ સન્તતમ્ ।

નિર્ણીતં મુખનેત્રપઙ્કજવનીમાધ્વીકપાનાન્મુહુ-
    ર્માદ્યન્તો મધુપા ભ્રમન્તિ પરિતો વક્ત્રાલકવ્યાજતઃ ॥ ૬॥

ત્વદ્ભાલે નિકષોપલે વિજયતે કાશ્મીરગોરોચના-
    સમ્ભૂતસ્તિલકઃ પરીક્ષણવિધૌ કિં હેમરેખોદ્ગમઃ ।
ચાઞ્ચલ્યં ચપલા વિહાય જલદં કિં વા સમાલમ્બતે
    કિં વા મારકતસ્થલે સમુદિતઃ કન્દર્પવૃક્ષાઙ્કુરઃ ॥ ૭॥

ત્વદ્ભૂવલ્લિમિષેણ કાર્મુકલતામાકૃષ્ય પુષ્પાશુગઃ
    કૃત્વા ચમ્પકકોરકં ચ તિલકવ્યાજેન બાણં હરે ।
લક્ષ્યં કુન્તલનીલકણ્ઠમતુલશ્રીચન્દ્રકં વિધ્યતિ
    પ્રાયઃ શત્રુસમાનનામ્ન્યપિજને ક્રોધો યદૂર્જસ્વિનામ્ ॥ ૮॥

નિઃશેષપ્રમદામનોમનસિજક્રીડામહામન્દિર-
    વ્રીડાવજ્રકપાટિકાવિઘટનપ્રૌઢાકૃતિઃ કુઞ્ચિકા ।
દુર્માનગ્રહિલત્રિલોકમહિલામાનચ્છિદાકર્તરી
    શૃઙ્ગારદ્રુમમઞ્જરી સ્ફુરતિ કિં ગોવિન્દ તે ભ્રૂલતા ॥ ૯॥

નો કાર્યં શ્રુતિવર્ત્મલઙ્ઘનમિદં નાલીકમુગ્ધાકૃતિઃ
    પર્યન્તાકલનં વિધાય સહજસ્વચ્છેન ભાવ્યં સદા ।
અન્તઃ કૃષ્ણમુપાસ્ય તદ્રુચિમતા સમ્ભાવના સર્વતઃ
    કાર્યેત્યમ્બુજલોચનાક્ષિયુગલં માનં દધૌ તે સતામ્ ॥ ૧૦॥

સૌન્દર્યામૃતદીર્ઘિકે તવ દૃશૌ પક્ષ્માવલિશ્ચૈતયોઃ
    કૂલે કામકૃષીવલેન રચિતા શૃઙ્ગારસસ્યોન્નતિઃ ।
દૃગ્ભઙ્ગીર્નિગદન્તિ યાસ્તુ વિબુધા રત્યમ્ભસાં વીચય-
    સ્તાઃ સ્યુર્ગોપવધૂહૃદમ્બુજવનીદોલાયિતા યત્નતઃ ॥ ૧૧॥

દૂરે બ્રહ્મશિવેન્દ્રપૂર્વદિવિષદ્વૃન્દે નમસ્કુર્વતિ
    વ્યાવલ્ગદ્વ્રજબાલકૌઘલગુડત્રુટ્યત્કિરીટે હઠાત્ ।
સાવજ્ઞા મધુમત્તસુન્દરદૃશાં શોભાદ્વિષઃ સાલસાઃ
    દૃક્પાતાસ્તવ નન્દવંશતિલક સ્વાન્તે સદા સન્તુ મે ॥ ૧૨॥

મુક્તેરપ્યતિદુર્લભા હિમગિરિપ્રસ્યન્દિમન્દાકિની-
    ધારાતોઽપ્યતિશીતલાતિમસૃણા ચાન્દ્રાન્મયૂખાદપિ ।
વાઞ્છાતોઽપ્યતિવિસ્તૃતા વિષયિણાં ત્વત્પાદચિન્તાપર-
    સ્વાન્તાદપ્યતિનિર્મલા મયિ કૃપાદૃષ્ટિસ્તવાસ્તાં હરે ॥ ૧૩॥

કલ્પાન્તાગ્નિશિખોન્નતિર્દિતિસુતવ્રાતે પ્રપન્ને જને
    પીયૂષદ્રવસિન્ધુવૃષ્ટિરમરસ્તોમે વિભૂત્યાયતિઃ ।
સીમા પ્રેમભરસ્ય ગોપનિકરે કન્દર્પકાણ્ડાહતિ-
    ર્બ્રહ્માણ્ડોદરસુન્દરીહૃદિ હરે જીયાદ્દૃશોસ્તે દ્યુતિઃ ॥ ૧૪॥

નિર્બન્ધેન યદીન્દ્રનીલમહસા સમ્પાદિતૌ દર્પણૌ
    તાભ્યાં કિં તુલના કપોલતલયોઃ સમ્ભાવ્યતે વા ન વા ।
એવં જ્ઞાતુમુપાગતે શ્રુતિપથં નેત્રે ત્રપાકુઞ્ચિતે
    શઙ્કે દ્વૈધવતી ત્વદીયવદનપ્રાન્તશ્રિયં પશ્યતઃ ॥ ૧૫॥

ત્વાં પાદાઙ્ગદકઙ્કણાઙ્ગદશિરોલઙ્કારહારામ્બરૈઃ
    સમ્પૂજ્ય પ્રદદૌ સુતામથ મણિં રત્નાકરઃ કૌસ્તુભમ્ ।
આસ્યે તસ્ય સુતઃ સુધાંશુરખિલાં કાન્તિં યદા દત્તવા-
    ન્સ્વાકારં વ્યતરંસ્તદૈવ મકરાઃ કિં કુણ્ડલાન્તસ્તવ ॥ ૧૬॥

લાવણ્યામૃતવાહિની તવ મુખસ્યેયં મનોજ્ઞાકૃતિ-
    સ્તસ્યામદ્ભુતબુદ્બુદઃ સમભવત્તત્રાપિ ફેનોદ્ગમઃ ।
નાસાવંશગતં તમેવ વિશદં મુક્તાફલં યે વિદુ-
    સ્તે માન્યા મધુસૂદન ત્વયિ મનોવૃત્ત્યૈવ ધન્યા યતઃ ॥ ૧૭॥

નેત્રામ્ભોજમુખેન્દુભાલતિલકૈર્નિત્યં વિવાદો યતઃ
    સૌન્દર્યાર્થમિતિ પ્રતીત્ય વિધિના સીતા કૃતા નાસિકા ।
તૂણી વા કુસુમાયુધસ્ય નૃપતેર્યન્મલ્લિકાકોરકઃ
    કાણ્ડસ્તત્ર ચકાસ્તિ મૌક્તિકફલવ્યાજેન નન્દાત્મજ ॥ ૧૮॥

યોઽહં તે પદપઙ્કજદ્યુતિલવં પ્રાપ્યાભવં પલ્લવઃ
    કલ્પક્ષ્મારુહમસ્તકાભરણતાં યાતશ્ચ રાધાપતે ।
તં માં નિન્દતિ બિમ્બવિદ્રુમલતાશ્રીતસ્કરોઽયંશ્રુતા-
    વેવં જલ્પિતુમાગતે કિસલયે સ્થાનેઽધરો રાગવાન્ ॥ ૧૯॥

દૃગ્ભઙ્ગીઃ સ્ફુરદિન્દ્રનીલનિચયઃ પક્ષ્માણિ કસ્તૂરિકા
    જિહ્વેયં તવ પદ્મરાગનિકરઃ શોણાધરો વિદ્રુમઃ ।
દન્તાલી ગજમૌક્તિકાનિ મધુજિન્મન્દસ્મિતં ચન્દનં
    પણ્યસ્થાનમિદં મનોજવણિજો જાને તવાસ્તે મુખમ્ ॥ ૨૦॥

યા રક્તા વદનેન્દુમણ્ડલગતં માધુર્યમુચ્ચૈસ્તરા-

માસ્વાદ્યેહ સરસ્વતી સ્થિતવતી સત્યં રસજ્ઞેવ સા ।
યત્સપ્તસ્વરમણ્ડલાનિ બહુધા ત્વત્કણ્ઠદેશાદ્બહિઃ
પ્રાદુર્ભૂય મુદં શ્રુતૌ સુકૃતિનાં યચ્છન્તિ નન્દાત્મજ ॥ ૨૧॥

સામ્યં ત્વદ્વદનસ્ય વાઞ્છતિ વિધુર્દોષાકરો યદ્યપિ
ક્ષિપ્તોઽપ્યમ્બુનિ પદ્મરાગશકલો દન્તચ્છદં સ્પર્ધતે ।
દૃષ્ટ્વૈવં કુશલઃ કુશેશયભવઃ ક્લેશાદ્યશોદાત્મજ
વ્યક્તં ત્વચ્ચિબુકં તથૈવ વિદધે યત્તુલ્યતા ન ક્વચિત્ ॥ ૨૨॥

માધુર્યં ન લવં મધૂનિ દધતિ દ્રાક્ષા તુ સાક્ષાદ્વિષં
પીયૂષાન્યપિ યાન્તિ નિમ્બસમતાં કે દુગ્ધખણ્ડાદયઃ ।
પ્રાલેયાનિ ન શીતલાનિ સરસં નો કોકિલાકૂજિતં
ગોધુગ્વંશવતંસ જાતુ જયતિ ત્વદ્વાગ્વિલાસોદયે ॥ ૨૩॥

વેદાશ્ચન્દ્રમસં વદન્તિ ભવતઃ સ્વાન્તં કથં તદ્વૃથા-
કુર્વન્ત્યત્ર વિવાદમાત્રકુશલા ગોવિન્દ નન્દાદયઃ ।
તસ્યૈવામૃતપઙ્ક્તિલાસ્તવ મુખાદાવિર્ભવન્તો બહિ-
ર્ધ્વાન્તં યત્તિરયન્તિ હન્ત કિરણા મન્દસ્મિતવ્યાજતઃ ॥ ૨૪॥

યન્નામસ્મરણાદપિ શ્રવણતઃ પ્રક્ષીણરાગાશયા
યાન્તિ ત્વત્પરમં સદાશિવપદં યદ્યોગિનાં દુર્લભમ્ ।
તસ્યાપ્યાનનપઙ્કજે તવ જયત્યુચ્ચૈસ્તરાં રાગિતા
યેનાભીરકુલપ્રદીપ તદલં તામ્બૂલમાસ્તાં મુદે ॥ ૨૫॥

પીયૂષદ્રવસારસારઘમધુદ્રોણી ત્વદીયાધરા-
સ્વાદાયાર્કસુતાતટે શ્રિતવતી સદ્વંશજાતા તપઃ ।
તત્પુણ્યૈર્મુરલીમિષેણ રસિકા માધુર્યમુચ્ચૈસ્તરા-
માસ્યેન્દોરનુભૂય ગોકુલપતે ગીતામૃતં મુઞ્ચતિ ॥ ૨૬॥

સાફલ્યં શ્રુતિસમ્પદાં ત્રિજગતાં પ્રાલેયધારાપ્રપા
પીયૂષદ્રવમાધુરી પરિભવક્લેશામ્બુધેઃ શોષણમ્ ।
બ્રહ્માનન્દતિરસ્કૃતિઃ કુલવધૂધૈર્યાદ્રિવજ્રાહતિઃ
કંસધ્વંસન શંસ કિં ન ભવતો વંશીનિનાદોદયઃ ॥ ૨૭॥

ધૈર્યં ધિક્કુરુતે ત્રપાં વિચિનુતે કૌલં યશઃ પ્રોઞ્છતિ
પ્રત્યેકં ગુરુવર્ગગર્જનશતં વિસ્મારયત્યઞ્જસા ।
સાધ્વીનામ નિરાકરોતિ ભવનં ભર્તુર્વિધત્તે વિષં

કિં કિં નો વિદધાતિ હન્ત સુદૃશાં વંશીનિનાદસ્તવ ॥ ૨૮॥

લાવણ્યૈરખિલૈસ્ત્વદાસ્યમુકુરં નિર્માય ધાતા ચિરા-
ન્મુષ્ટિં મારકતં વિધાય તદધઃ કણ્ઠસ્થલવ્યાજતઃ ।
ધ્યાયં ધ્યાયમશેષવસ્તુસુષમાધારાય રેખાત્રયં
બ્રૂતે નાસ્તિ બભૂવ નો ન ભવિતા સૌન્દર્યમેતાદૃશમ્ ॥ ૨૯॥

આશાનાગકરપ્રસારિમહસા નિઃશેષવામભ્રુવા-
માશાભિસ્ત્રિદશેશનિર્ભરશુભૈઃ કંસાદિનાશશ્રિયા ।
પ્રેમ્ણા નન્દયશોદયોસ્તનુજુષાં નિઃસીમભાગ્યૈર્દૃશાં
સૌભાગ્યૈર્વ્રજસુભ્રુવાં વ્રજપતે કિં તે ભુજૌ નિર્મિતૌ ॥ ૩૦॥

કં યસ્માદલમભ્યુદેતિ ભવતઃ સર્વાઙ્ગમેતાદૃશં
સામ્યં વા ભજતાં કથં જલરુહે સર્વજ્ઞમધ્યસ્થતોઃ ।
મત્તર્કઃ પુનરત્ર ગોકુલપતે ત્રૈલોક્યલક્ષ્મી યત-
સ્ત્વત્પાણ્યોરિતિ તૌ વદન્તિ કમલે સા યત્તદેકાલયા ॥ ૩૧॥

અઙ્ગુલ્યસ્તવ હસ્તયોર્મુરહર પ્રાયો રસાલાઙ્કુર-
શ્રેણી યત્પરિતોઽઙ્ગુલીયકમિષસ્નિગ્ધાલવાલાવલિઃ
કિં વા પઞ્ચશરપ્રચણ્ડતપસા પઞ્ચાશુગાઃ પઞ્ચતો-
ત્તીર્ણાઃ સત્ફલિનઃ પુનર્ભવરુચા પુષ્ણન્તિ નેત્રોત્સવાન્ ॥ ૩૨॥

ભક્તાનુગ્રહકાતરેણ ભવતા કૃત્વા નૃસિંહાકૃતિં
રાગાન્ધસ્ય પુરા હિરણ્યકશિપોર્વક્ષસ્થલી પાટિતા ।
તેનાભૂત્તવ પાણિપઙ્કજયુગે રાગઃ સ રાધાપતે
ગોપીનાં કુચકુઙ્કુમૈર્દ્વિગુણિતો નાદ્યાપિ વિશ્રામ્યતિ ॥ ૩૩॥

એતૌ પઞ્ચશિરસ્ત્વિષા દશદિશઃ સમ્ભાવયન્તૌ ભૃશં
દૈત્યપ્રાણસમીરસંહતિયમૌ શ્યામૌ ભુજઙ્ગોત્તમૌ ।
તન્મૌલિદ્યુતિશાલિની પુનરિયં રત્નાવલી જૃમ્ભતે
યાં પ્રાહુસ્તવ ગોકુલેશ નખરશ્રેણીં કરસ્થાં જનાઃ ॥ ૩૪॥

દોર્દણ્ડદ્વયબન્ધનાનિ વિદધુર્નન્દોપનન્દાદય-
સ્તદ્ગ્રન્થિત્રુટિશઙ્કયાતિચકિતા ગોવર્ધનોદ્ધારણે ।
તાન્યેવાપ્રતિમપ્રભાણિ હરિતો વિદ્યોતયન્ત્યદ્ભુતં
વિદ્વાંસસ્તવ કઙ્કણાઙ્ગદતયા ગોવિન્દ યજ્જાનતે ॥ ૩૫॥

શૃઙ્ગારદ્રુમસારકણ્ડનવશાત્ત્રૈલોક્યસીમન્તિની-
 ક્રીડામન્દિરમણ્ડનાય વિધિના સ્તમ્ભૌ પ્રલમ્બૌ કૃતૌ ।
તન્મધ્યે પુનરિન્દ્રનીલમણિભિઃ સમ્પાદિતા વેદિકા
 તૌ બાહૂ મધુજિદ્વદન્તિ ભવતો વક્ષઃસ્થલીં તામપિ ॥ ૩૬॥

યદ્ભક્તઃ કમલાકરં કરતલેનાલમ્બતે ભાસ્કર-
 સ્ત્વચ્ચક્ષુર્મુખપાણિપાદકમલે જાતસ્તતઃ શોણિમા ।
તન્મિત્રં પુનરાકલય્ય સ ધૃતઃ કણ્ઠે ત્વયા કૌસ્તુભ-
 વ્યાજેનેતિ મુકુન્દ માદૃશિ જને તર્કઃ સમુજ્જૃમ્ભતે ॥ ૩૭॥

આલોક્યાખિલવેદશાસ્ત્રજલધેસ્તત્ત્વં યદેકાન્તતઃ
 કૃત્વા સઙ્કુલિતં સ્વકીયનિલયે ક્ષીરાબ્ધિમધ્યે ધૃતમ્ ।
સર્વાર્થપ્રતિભાસકં વ્રજકુલાલઙ્કાર તત્કૌસ્તુભ-
 વ્યાજાદ્વિસ્મૃતિશઙ્કયેવ ભવતા કણ્ઠે કૃતં સામ્પ્રતમ્ ॥ ૩૮॥

યાત્વા વિષ્ણુપદં સમાશ્રિતવતી નક્ષત્રમાલા સ્ફુર-
 દ્દીપ્તિર્યોગ્યમિદં કથં મુરરિપો નક્તન્દિનં દ્યોતતે ।
આં જ્ઞાતં દયિતં તવાનનવિધું યાન્તીમિમાં યામિની
 રોમશ્રેણિમિષાત્તતો ધૃતવતી જ્ઞાત્વા સપત્નીમિયમ્ ॥ ૩૯॥

યઃ પાશેન યશોદયા નિયમિતો યેનાપરાધં વિના
 તસ્મિન્નસ્તિ વલિસ્ત્રિધા મયિ પુરઃ સોઽયં બલિધ્વંસિનઃ ।
એવં ચિન્તનતત્પરઃ કૃશતરસ્ત્વન્મધ્યદેશો ભૃશં
 યાશોદેય સ શોકમુદ્ગિરતિ તે રોમાવલિવ્યાજતઃ ॥ ૪૦॥

સૃષ્ટ્યાદૌ પ્રકૃતિર્ગુણત્રયમયી યા સ્વીકૃતાઽઽસીત્ત્વયા
 સેયં સત્ત્વમયી સુખાય જગતાં હારાકૃતિસ્તે ભુવિ ।
ગુઞ્જાદામમિષાન્મુકુન્દ દધતી રાગાદ્રજોવિગ્રહં
 નાભીસીમ્નિ તમોમયી પુનરિયં રોમાવલી રાજતે ॥ ૪૧॥

સૌન્દર્યામૃતવારિધૌ સ્મરમહાયાદઃસમારમ્ભતઃ
 સમ્ભૂતા ભ્રમિરમ્ભસાં સુલલિતા જાતાસ્તતો વીચયઃ ।
તાં જાને સ્ફુરદિન્દ્રનીલઘટિતશ્રીસમ્પુટાર્ધદ્યુતિં
 ત્વન્નાભીમપિ તાં વલિત્રયમિતિ શ્યામાભિરામાકૃતે ॥ ૪૨॥

નીલામ્ભોરુહવલ્લિરુલ્લસતિ તે નાભીસરસ્યાં ધ્રુવં
 યચ્છ્રીવત્સમિષાદ્બિભર્તિ કુસુમં નાલં ચ રોમાવલી ।

યં વા વક્ષસિ કૌસ્તુભં બુધજના જાનન્તિ નન્દાત્મજ
    પ્રાયઃ સોઽપ્યનુરાગ એવ ભવિતા ત્રૈલોક્યવામભ્રુવામ્ ॥ ૪૩॥

નીરૂપોઽપિ ઘનદ્યુતિર્મુનિમનોમાત્રૈકપાત્રીકૃતો-
    ઽપ્યાભીરીગણસઙ્ગતઃ સુખઘનોઽપ્યાનન્દિતો બન્ધવૈઃ ।
જ્ઞાનાત્માપ્યતિમુગ્ધતામુપગતો વામભ્રુવાં વિભ્રમૈ-
    રિત્થં તે ત્રિવલીમિષાન્મુરહર ત્ર્યય્સ્તિ ચિત્રાર્પિતા ॥ ૪૪॥

દેવ્યઃ પલ્લવસમ્પદા વિદધતે સૌભાગ્યલક્ષ્મીં શ્રુતૌ
    સ્વચ્છન્દં સુમનઃફલાનિ વિબુધા વિન્દન્તિ તે સેવયા ।
વેદેનાપિ નિગદ્યતે મુરહર ત્વં ભક્તકલ્પદ્રુમઃ
    પ્રાયઃ કલ્પલતા તતઃ શ્રિતવતી ત્વાં વૈજયન્તીછલાત્ ॥ ૪૫॥

વિશ્વાનન્દકદમ્બસમ્પદમતિસ્નિગ્ધં તમાલદ્યુતિં
    દૃષ્ટ્વા નિર્ભરવિભ્રમં ઘન ઇતિ ત્વાં સઙ્ગતા વિદ્યુતઃ ।
ત્વદ્રૂપામૃતસિન્ધુસઙ્ગમવશાત્પ્રાપ્યામ્બરપ્રચ્યવં
    ચાઞ્ચલ્યાત્કિમુ નન્દનન્દન ભવત્પીતામ્બરત્વં દધુઃ ॥ ૪૬॥

કાઞ્ચી તે ધૃતયોગસમ્પદભિતો જાતા વિશાલાકૃતિ-
    ર્યાવન્તી મધુરા ધ્વનિં વિદધતી પશ્ચાદયોધ્યાભવત્ ।
માયાદ્વારવતી શિવાધિવસતિઃ સા કાશિકા દૃશ્યતે
    તચ્ચિત્રં ન વદામિ માધવ યતસ્ત્વાં સા સદા સંશ્રિતા ॥ ૪૭॥

જાનીમઃ સહજાં ત્વદઙ્ગમિલિતામાલોક્ય પદ્માલયાં
    તત્સઙ્ગસ્થિતિભઙ્ગકાતરતમૌ કલ્પદ્રુમૈરાવતૌ ।
આદ્યઃ પલ્લવસમ્પદં કરપદે બિમ્બાધરે ચાપરઃ
    શુણ્ડાદણ્ડગુણં તવોરુયુગલે યેનાદધે માધવ ॥ ૪૮॥

રમ્ભાસ્તમ્ભયુગં ન તદ્યદુપરિ સ્થૂલં તથોરુદ્વયં
    તૂણીરૌ મકરધ્વજસ્ય સુમનોમોદેન વિદ્મો વયમ્ ।
હા કષ્ટં મધુકૈટભૌ સ્ફુટમદૌ કિં કૈટભારે હઠા-
    ન્નિષ્પિષ્ટૌ શતકોટિકોટિકઠિનૌ તસ્મિન્સ્થલે કોમલે ॥ ૪૯॥

સ્તમ્ભદ્વૈતમિદં પયોનિધિસુતાગેહસ્ય મન્દાકિની-
    સ્યન્દામન્દમરન્દિતાઙ્ઘ્રિકમલદ્વન્દ્વસ્ય નાલાયુગમ્ ।
ત્વજ્જઙ્ઘાયુગલં વિમુક્તિકલશીનિર્માણદણ્ડદ્વયં
    સમ્પત્તિદ્વિપસઙ્ઘયન્ત્રણવિધાવાલાનયુગ્મં ભજે ॥ ૫૦॥

વિદ્વાન્ સોઽપિ કથં કઠોરકમઠીપૃષ્ઠેન તુલ્યં વદ-
    ન્નીદૃક્પાદયુગં કથં નુ કમલાવક્ષોજશૈલે દધત્ ।
ધિઙ્મન્દાં વસુધામિદં મધુરિપો ગોચારણે સઞ્ચરત્-
    પાષાણાઙ્કુરકણ્ટકાદિષુ હઠાદૃષ્ટ્વા વિદીર્ણા ન યત્ ॥ ૫૧॥

યદ્રત્નૌઘમરીચયોઽપિ સમતાવ્યાવર્તનં વિશ્વતઃ
    કૃત્વા દિગ્વલયં ભ્રમન્તિ મહિતા નાદૈર્મધુસ્યન્દિભિઃ ।
યચ્ચ બ્રહ્મશિવેન્દ્રવન્દિતપદદ્વન્દ્વોપરિ દ્યોતતે
તત્કૃષ્ણસ્ય પદાઙ્ગદદ્વયમતઃ કિં વર્ણ્યતાં માદૃશૈઃ ॥ ૫૨॥

શેતે યત્કમલાલયા તવ પદામ્ભોજદ્વયે સંગતા
    ધાતા તત્ર તનૂપધાન્યુગલં ગુલ્ફચ્છલાન્નિર્મમે ।
કિં વા મન્મથકારુણા વિરચિતે તસ્યા મુદે કન્દુકે
    સા યત્ક્રીડતિ પાણિપઙ્કજતલે કૃત્વા સખીભિઃ સહ ॥ ૫૩॥

યા રક્તા દશલોકપાલમુકુટપ્રાન્તત્વિષઃ સન્તતં
    કલ્પક્ષ્મારુહપુષ્પસમ્ભૃતરુચસ્ત્વત્પાદમૂલે બભુઃ ।
તા દીવ્યન્નખરાઞ્ચિતાઙ્ગુલિતયા જાનન્તિ સત્યં જનાઃ
    સ્વસ્મિન્નેવ સદાધરેણ દધતે લેખા યદૂર્ધ્વશ્રિયમ્ ॥ ૫૪॥

પીયુષદ્યુતિબિમ્બમમ્બરતલે વિદ્યોતમાનં પુરઃ
    પ્રેક્ષ્યોત્ફુલ્લદૃશા ત્વયા મુહુરિદં દેહીતિ યદ્ભાષિતમ્ ।
તન્મન્યે તવ પઙ્કજેક્ષણ મહચ્ચિત્રં યશોદાર્થનં
    યત્ત્વત્પાદસરોજયોર્નખમણિવ્યાજેન શીતાંશવઃ ॥ ૫૫॥

સત્યં યદ્વિબુધા વદન્તિ પદયોર્દ્વન્દ્વં તવામ્ભોરુહે
    ગોધૂલિચ્છલતઃ સ્થિતાનિ પરિતો હંસાલિચેતાંસ્યલમ્ ।
પીત્વૈતન્મકરન્દબિન્દુમસકૃદ્વૃન્દાવનીભૂપતે
    મઞ્જીરદ્વયમઞ્જુશિઞ્જિતમિષાદઞ્ચન્તિ યત્પઞ્ચમમ્ ॥ ૫૬॥

આકૃષ્યાખિલવસ્તુતઃ પ્રથમતો રાગં મુનીન્દ્રૈસ્તતઃ
    કૃત્વા માનસપઙ્કજે તવ પદદ્વન્દ્વં સ તસ્મિન્ધૃતૈઃ ।
યેનાસ્મિન્નરવિન્દલોચન પુનસ્તત્કેસરાણાં દ્યુતિ-
    સ્તોમેનાપિ સમઞ્ચિતઃ સમુદયત્યુચ્ચૈસ્તરાં શોણિમા ॥ ૫૭॥

હંસાસ્ત્વામુપનીય માનસસરોજન્મપ્રદેશેઽનિશં

ક્રીડન્તઃ કમલાલયેન ભવતા સાર્ધં પ્રમોદં દધુઃ ।
સ ત્વં લોચનલોહિતાધરપદદ્યોતઃ શ્રિતો હંસતાં var લોહિતલોચના
તત્સમ્પર્કવશાદિતિ વ્રજકુલાલઙ્કાર શઙ્કામહે ॥ ૫૮॥

ક્ષુદ્રાત્મા નિતરાં કિમુન્નતતરઃ કાઠિન્યવાન્નિર્ભયં
કિં યા કેવલકોમલઃ શ્રયતિ ચેત્કિઞ્ચિન્મદીયં પદમ્ ।
ધન્યઃ સોઽયમિતીવ લોકમખિલં સમ્બોધયન્માધવ
ત્વં ધત્સે પદયોર્યવં ધ્વજવરં દમ્ભોલિમમ્ભોરુહમ્ ॥ ૫૯॥

ત્વાં નિત્યં સમુપાસ્ય દાસ્યવિધયા સ્થાસ્યામ ઇત્યાશયા
બ્રહ્મેન્દ્રાદ્યમરૈસ્ત્વદીયપદયોઃ સ્વીયા ધૃતાઃ સમ્પદઃ ।
તાસામઙ્કુશનીરજાશનિલસચ્છત્રધ્વજાદ્યાકૃતિં
બિભ્રાણા વિજયશ્રિયં ત્રિજગતાં વન્દ્યારવિન્દાલયા ॥ ૬૦॥

ત્વત્પાદામ્બુજસઙ્ગમાત્ત્રિજગતાં વન્દ્યારવિન્દાલયા
સ્થાને સ્થાનગુણાદ્ભવન્તિ હિ જનાઃ પ્રાયઃ પદં સમ્પદામ્ ।
કિં ત્વેકં શતપત્રલોચન મહચ્ચિત્રં યદસ્માદધઃ
પાતા પુણ્યતમા વિમુક્તિનગરીનિઃશ્રેણિકા સ્વર્ધુની ॥ ૬૧॥

યત્પાદામ્બુ વિધાય મૂર્ધનિ ચિતાવાસઃ શિવત્વં હઠા-
ત્પ્રાપ્તો ભક્ષિતકાલકૂટનિકરો મૃત્યુજયત્વં યયૌ ।
દિગ્વાસા નૃકપાલમાત્રવિભવશ્ચાવિન્દદીશાનતાં
સ ત્વં નન્દસિ યસ્ય મન્દિરગતો નન્દાય તસ્મૈ નમઃ ॥ ૬૨॥

ધૂલીધૂસરિતં મુખં તવ શરત્પૂર્ણેન્દુનિન્દાવહં
વ્યાલોલાલકકુણ્ડલદ્યુતિ ચલન્નેત્રશ્રિયા પ્રોલ્લસત્ ।
યાલોક્યાર્દ્રવિલોચના સ્મિતમુખી પ્રસ્યન્દમાનસ્તની
પાણિભ્યામવલમ્બ્ય ચુમ્બિતવતી તાં નન્દજાયાં ભજે ॥ ૬૩॥

પીત્વા સ્તન્યવિષં સહાસુપવનૈઃ સમ્પાતિતે પૂતના-
દેહે વૈ ભવતા જનાર્દન તૃણાવર્તે ચ નીતે ક્ષયમ્ ।
રાહૂન્મુક્તસુધામયૂખસુષમા યાદૃક્ચકોરાલિભિ-
ર્યાભિસ્ત્વદ્વદનદ્યુતિશ્ચુલુકિતા તા ગોપકન્યાઃ સ્તુમઃ ॥ ૬૪॥

યદ્બન્ધસ્ય વિધિત્સયાપિ વિવશઃ કીનાશપાશૈર્દૃઢં
બદ્ધઃ સાનુગપુત્રબાન્ધવજનો દુર્યોધનોઽન્તં ગતઃ ।
તં ત્વાં યેન નિબધ્ય નન્દદયિતા વૃન્દારકૈર્વન્દિતા

જાતાઽઽનન્દમયી મુકુન્દ મહતે ભાવાય તસ્મૈ નમઃ ॥ ૬૫॥

નિર્ભિન્ને યમલાર્જુનેઽતિચકિતાસ્તૂર્ણં ગૃહાન્નિર્ગતાઃ
પીત્વા દૃક્ચષકૈસ્ત્વદક્ષતતનૂરૂપામૃતં નિર્વૃતાઃ ।
ત્વામાદાય વિધાય નેત્રસલિલૈઃ સિક્તં ત્વરામાશ્રિતા
યે વૃન્દાવનમાગતાઃ કૃતધિયસ્તાન્ગોપવૃદ્ધાન્સ્તુમઃ ॥ ૬૬॥

કૃત્વા કાલિયદન્દશૂકદમનં ત્વય્યાસ્થિતે તાણ્ડવં
તસ્યોત્તબ્ધસમસ્તમસ્તકમણિસ્તોમે સમુત્તસ્થુષિ ।
યેનાલમ્ભિ વિભાતભાસ્કરસુરપ્રાગ્ભારશોભાસ્ફુર-
દ્રક્તામ્ભોજયુગદ્યુતિઃ પ્રતિપદં તત્તેઽઙ્ઘ્રિયુગ્મં ભજે ॥ ૬૭॥

ઉત્ફુલ્લૈઃ પરિપીય કર્ણપુટકૈર્વંશીનિનાદામૃતં
તચ્ચ ઘ્રાણમુદસ્ય દત્તકવલં પ્રોદ્ભિન્નરોમાઙ્કુરમ્ ।
નિઃસ્પન્દૈર્નયનૈરમન્દમધુરૈઃ શ્યામં મહસ્તાવકં
યેનોદ્વીક્ષિતમમ્બુજેક્ષણ ભજે તદ્ગોકદમ્બં તવ ॥ ૬૮॥

જમ્મારેઃ સ્ફુરદાયુધસ્ય ભવતા દમ્ભાદ્રિવિદ્રાવણં
કૃત્વા વામભુજેન સપ્તદિવસાન્યોઽસૌ ધૃતઃ પર્વતઃ ।
સોઽસ્તુ સ્નિગ્ધતમાલસારઘટિતસ્તમ્ભૈકસમ્ભાવિત-
પ્રાસાદદ્યુતિનિન્દકઃ પ્રતિપદં ભવ્યાય ગોવર્ધનઃ ॥ ૬૯॥

ત્વદ્બાહૂદ્ધૃતપર્વતાર્પિતદૃશઃ પ્રેક્ષ્ય પ્રિયાયાઃ સ્ખલ-
દ્વાસઃપીનપયોધરક્ષિતિધરૌ દોઃસ્તમ્ભકમ્પે તવ ।
શૈલે ચઞ્ચલતાં ગતે વ્રજપતે ત્રાસાકુલે ગોકુલે
નન્દે મન્દમુખદ્યુતૌ જયતિ તે મન્દાક્ષમન્દેક્ષણમ્ ॥ ૭૦॥

પૌગણ્ડં મદખણ્ડનં બલભિદઃ કિં તે હરે સ્તૂયતે
કૌમારં ચરિતં યતો વિજયતે વ્યામોહનં બ્રહ્મણઃ ।
કિં સ્તવ્યં તવ યૌવનં ત્રિપુરજિદ્યદ્બાણયુદ્ધે જિતઃ
સમ્મોહં ગમિતાસ્ત્વયા યદબલા ભાવેઽપિ નેત્રશ્રિયા ॥ ૭૧॥

પીતે દાવહુતાશને નિજજનત્રાણૈકહેતોસ્ત્વયા
નિઃસ્પન્દં પશુપૌઘપક્ષિપશુભિઃ પેપીયમાને ત્વયિ ।
પ્રેમાર્દ્રાણ્યતિનિર્મલાનિ દિવિષચ્ચિત્તાનિ સત્યં મુહુ-
સ્ત્વદ્ગાત્રે નુ વિતીર્યમાણકુસુમવ્યાજેન ભાન્તિ પ્રભો ॥ ૭૨॥

કહ્લેલ્લિસ્તબકં મુહુઃ કમલિનીકાન્તં પ્રતીચીગતં
પર્યાલોચ્ય વિલોક્ય ધૂમપટલં ગોધૂલિબુદ્ધ્યાકુલાઃ ।
ઉચ્ચૈઃ કોકિલકૂજિતં ચ મુરલીનાદં વિદિત્વા ગૃહા-
ત્ત્વાં યા વીક્ષિતુમાગતાઃ પથિ ગવાં ગોપાઙ્ગનાસ્તાઃ સ્તુમઃ ॥ ૭૩॥

સાયાહ્ને સમુદઞ્ચતિ શ્રુતિપથં વંશીનિનાદે હઠા-
ન્નેપથ્યસ્ય સમાપનેન શપથૈરાલીજનૈઃ પ્રાર્થિતે ।
પાણિભ્યામવલમ્બ્ય નીવિરશના નિર્ગમ્ય તૂર્ણં બહિ-
ર્દૃગ્ભ્યાં તે મુખસૌરભં ચુલુકિતં યાભિર્ભજે તા જનીઃ ॥ ૭૪॥

યત્રાઘાસુરકેશિધેનુકબકારિષ્ટપ્રલમ્બાદયઃ
ક્રોધાગ્નૌ ભવતા હુતા દિતિસુતાઃ સન્તર્પિતા દેવતાઃ ।
યસ્મિંસ્તે પદપઙ્કજદ્વયરજઃ પદ્મોદ્ભવપ્રાર્થિતં
ભેજુર્ગોમૃગપક્ષિભૂરુહલતા વૃન્દાવનં તદ્ભજે ॥ ૭૫॥

દેવેન્દ્રસ્ય પરાભવં કિમપરં વ્યામોહનં બ્રહ્મણઃ
સમ્પશ્યન્નપિ વૈભવં વ્રજકુલોત્તંસ પ્રચેતાસ્તવ ।
નન્દં યત્પિતરં જહાર ભવતઃ સ્થાને જલાત્મન્યદઃ
સ્થાને તાદૃશિ તે બભૂવ ન મનાક્ક્રોધસ્ય લેશોઽપિ તત્ ॥ ૭૬॥

મઞ્જીરદ્વયકઙ્કણાવલિલસત્કાઞ્ચીઘટાશિઞ્જિતે
વીણાવેણુમૃદઙ્ગઝર્ઝરકરોત્તાલે દિશશ્ચુમ્બતિ ।
કામં પૂર્ણકલાનિધૌ વિલસતિ ભ્રશ્યત્પટે સ્વર્વધૂ-
વૃન્દે વર્ષતિ દૈવતે સુમનસો રાસસ્તવાસ્તાં મુદે ॥ ૭૭॥

નૃત્યદ્ભ્રૂનયનોત્પલસ્મિતમુખસ્વિદ્યત્કપોલસ્થલં
લીલાચઞ્ચલકુણ્ડલં ભુજલતાન્દોલક્વણત્કઙ્કણમ્ ।
ત્રુટ્યત્કઞ્ચુકબન્ધમુન્નતકુચં તિર્યક્ત્રિકં પ્રસ્ખલ-
ન્નીવિ વ્યઞ્જિતશિઞ્જિતં જયતિ તે રાસઃ પ્રિયાભિઃ સહ ॥ ૭૮॥

આકુઞ્ચદ્રદનં ક્વચિદ્વિલસિતામ્ભોજાસ્યશોમં ક્વચિ-
ન્મન્દસ્યન્દિવિલોચલં ક્વચિદલં દૃક્ચાપલં કુત્રચિત્ ।
ક્વાપ્યુદ્દામમદાન્ધસિન્ધુરગતં કુત્રાપિ વિદુલ્લતા-
ચાઞ્ચલ્યં સ્મરવર્ધનં વિજયતે લાસ્યં પ્રિયાણાં તવ ॥ ૭૯॥

અધ્યાસ્યોરુતલં વપુઃ પુલકિતં સ્વિદ્યત્કપોલસ્થલીં
દોર્વલ્લીમપિ તાવકાંસમિલિતાં કમ્પાકુલાં બિભ્રતિ ।

પ્રોદ્યત્પૂર્ણકલાનિધાવરુચિરે સ્મેરે મુહુઃસીત્કૃતે
    રાધા ધન્યતમા દધાર વદને તામ્બૂલકલ્કં તવ ॥ ૮૦॥

યસ્યાં તુઙ્ગતરઙ્ગસઙ્ગમવશાદ્ભીતા ભુજઙ્ગભ્રમા-
    દાલિઙ્ગતિ વરાઙ્ગનાસ્તવ જલક્રીડાજુશોઽઙ્ગં હઠાત્ ।
સા નિત્યં દલિતેન્દ્રનીલનિકરશ્રીતસ્કરા ભાસ્કર-
    સ્યાપત્યં તટિની શિવં દિશતુ મે ગોપાલભૂપાલજ ॥ ૮૧॥

ઉત્ફુલ્લામ્બુજમાકલય્ય દયિતાસ્મેરાનનં વિભ્રમ-
    દ્ભૃઙ્ગશ્રેણિમનઙ્ગભઙ્ગુરદૃશસ્તસ્યાઃ કટાક્ષચ્છટામ્ ।
શૈવાલં પરિગૃહ્ય કુન્તલધિયા દ્રાક્ચુમ્બનાયોદ્યત-
    સ્ત્વં યસ્યાં હસિતઃ પ્રિયાભિરભિતસ્તાં ભાનુકન્યાં ભજે ॥ ૮૨॥

પુષ્પં ત્વય્યવચિન્વતિ પ્રિયતમાવૃન્દેન સાર્ધં મુદા
    વૃન્દારણ્યમહીરુહસ્ય નિકરે કમ્પાકુલે નિર્ભરમ્ ।
તસ્મિન્વર્ષતિ કૌતુકેન કુસુમાન્યુચ્ચૈઃ પુનર્દૈવત-
    સ્તોમેઽપિ વ્રજભૂપતે વિજયતે તૈસ્તૈશ્ચિતં તે વપુઃ ॥ ૮૩॥

કાન્તાકોટિકલાકુલસ્ય ભવતઃ સન્તોષ્ય રાસે સ્મર-
    ક્ષીણાં વીક્ષ્ય નિશાં નિશાકરકરસ્તોમે પરં મુઞ્ચતિ ।
સાતઙ્કં સમુપાગતસ્ય સદનાદ્યાન્તં શયાને જને
    કીરસ્યાપિ ગિરા જયન્તિ પરિતઃ પર્યાકુલા દૃષ્ટયઃ ॥ ૮૪॥

ઉદ્યન્નેવ ભવાનિવ વ્રજભુવાં સર્વાપદાં સંહતિ-
    ધ્વાન્તસ્તોમમનુત્તમં તમનયત્કાન્તઃ સરોજન્મનામ્ ।
સોલ્લાસાનિ સરોરુહાણિ નયનાનીવ ત્વદાલોકને
    લોકાનાં કિલ નન્દવંશતિલક સ્વાપસ્ય નાયં ક્ષણઃ ॥ ૮૫॥

મિત્રેણેહ તમસ્વિનીં વિનિહતાં નાથ ત્વયા પૂતનાં
    વ્યાધૂતામિવ કૈરવેષ્વપિ ભવદ્વિદ્વેષિવક્ત્રદ્યુતિમ્ ।
આશાં પશ્ય પુરન્દરસ્ય દયિતાં રક્તામ્બરાલઙ્કૃતાં
    સિન્દૂરાન્વિતકુમ્ભમમ્બરમણેર્બિમ્બં વહન્તીં પુરઃ ॥ ૮૬॥

ગીતજ્ઞાઃ કવયો નટા બહુકલાશિક્ષાસુ દક્ષાઃ પરે
    વિપ્રેન્દ્રાઃ કુશપાણયોઽપિ ભવનદ્વારેષુ સન્ત્યુત્સુકાઃ ।
તલ્પં મુઞ્ચ દદસ્વ લોચનફલં ત્વં દેહભાજામિતિ
    પ્રાતર્વન્દિગિરો જયન્તિ ભવતઃ સમ્બોધને નિત્યશઃ ॥ ૮૭॥ (વિશેષકમ્)

ભાનોર્મણ્ડલમાવિરસ્તિ પુરતો નાદ્યાપિ નિદ્રાહતિઃ
    કિં તે તાત બલાનુજેતિ જનનીવાગ્વીચિમાચામતઃ ।
અર્ધોન્મીલિતપાટલાક્ષિયુગલં પર્યસ્તનીલાલકં
    જૃમ્ભારમ્ભવિશેષશોભિ વદનામ્ભોજં ભજામસ્તવ ॥ ૮૮॥

મુઞ્ચન્તં શયનં ભવન્તમભિતઃ સઙ્ગમ્યગોપાઙ્ગના-
    સ્તૈલાભ્યઞ્જનમઞ્જનાદિ દધતીઃ સંવીક્ષ્ય દેવ્યશ્ચિરમ્ ।
ઉજ્ઝન્ત્યઃ સુમનોઽમ્બરાણિ સુમનોભાવા વરં સઙ્ગતાઃ
    પ્રાયો ગોપવધૂત્વલબ્ધિમનસૈવાકાશસામ્યં દધુઃ ॥ ૮૯॥ var ભૂયો
પ્રાતર્ભોજનમારચય્ય વિપિનં પ્રસ્થાતુકામે ત્વયિ
    પ્રાયો ગોપવધૂલતાસુ મિલિતઃ કન્દર્પદાવાનલઃ ।
યદ્ગોધૂલિમિષાદુદેતિ પરિતો ધૂમાલિરભ્રંલિહા
    તાસામશ્રુરસાઃ સ્રવન્તિ ચ મુહુર્દન્દહ્યમાનેઽન્તરે ॥ ૯૦॥

પઞ્ચાસ્યે ચતુરાનને દશશતીનેત્રાદિપૂર્વે ગવા-
    મધ્વન્યધ્વનિ લોકપાલનિવહે ભૂમીલુઠન્મૂર્ધનિ ।
તદ્વ્યાઘ્રાજિનભૂષણાદિભિરલં ત્રસ્તે સમસ્તે પશૌ
    ગોપાઃ કોપવશાદ્ગૃહીતલગુડા હીહીરવાઃ સ્યુર્મુદે ॥ ૯૧॥

તિગ્માંશૌ તપતિ ક્વચિજ્જલમુચાં સ્તોમે જલં મુઞ્ચતિ
    પ્રેમાર્દ્રઃ પ્રતનોતિ યઃ સ્વવપુષા ચિત્રાતપત્રં તવ ।
સોઽયં ભાસ્કરકોટિભાસ્વરમહઃસમ્ભારપાટચ્ચરઃ
    પારીન્દ્રોઽસુરદન્તિનાં દિશતુ મેં ભવ્યં ભુજઙ્ગાન્તકઃ ॥ ૯૨॥

મધ્યાહ્ને યમુનાતટે વિટપિનાં મૂલે વયસ્યૈઃ સમં
    દધ્યન્નાન્યુપભુજ્ય રજ્યતિ પુનસ્તત્ક્રીડને ચ ત્વયિ ।
દેવેન્દ્રસ્ત્રિપુરાન્તકઃ કમલભૂરન્યે ચ નાકાલયાઃ
    કાકાકારજુષો મુહુઃ કવલયન્ત્યુચ્છિષ્ટમિષ્ટં તવ ॥ ૯૩॥

નિદ્રાણે ત્વયિ શીતલે તરુતલે તલ્પૈ દલૈઃ કલ્પિતે
    સંવીક્ષ્યામ્બુજપત્રમન્દમરુતા સંવાહિતે પાદયોઃ ।
રુદ્રબ્રહ્મમહેન્દ્રતર્જનવિધૌ ગોપાર્ભકાણાં કર-
    વ્યાધૂતાનિ જયન્તિ ભઙ્ગુરદૃશાં કાન્તિશ્ચ શોણાયિતા ॥ ૯૪॥

સ્ફૂર્જન્તસ્તપસા પુલસ્ત્યપુલહાગસ્ત્યાઃ સદુર્વાસસઃ
    સન્ત્યુચ્ચૈર્યશસઃ પરેઽપિ સ પરં ધન્યો મુનિર્નારદઃ ।

યસ્ય ત્વદ્ગુણગાનમગ્નમનસો વ્યાપાદિતે કેશિનિ
　　પ્રાલેયાદ્રિવિનિઃસૃતામરધુનીધારાયતેઽસ્રાવલિઃ ॥ ૯૫॥

લક્ષ્માણિ ધ્વજવજ્રપઙ્કજયવચ્છત્રોર્ધ્વલેખાયુતા-
　　ન્યાલક્ષ્યામ્બુરુહાક્ષ તે ચરણયોઃ ક્ષોણીતલેઽઙ્કાય યઃ ।
ધ્યાયત્ત્યુત્પુલકત્યુદઞ્ચતિ લુઠત્યાક્રન્દતિ પ્રીયતે
　　કોઽન્યો ધન્યતમસ્તતસ્ત્રિભુવને સ્યાદ્ગાન્દિનીનન્દનાત્ ॥ ૯૬॥

ધન્યં તસ્ય જનુસ્તથૈવ પિતરૌ ધન્યં તદીયં કુલં
　　ધન્યા તેન વસુન્ધરા કિમધિકં તેનૈવ ધન્યં જગત્ ।
યઃ કંસૈકનિદેશવર્ત્યપિ ભવત્પાદામ્બુજાલોકના-
　　દઙ્કૂરોઽશ્રુનિરુદ્ધકણ્ઠકુહરઃ પ્રેમાબ્ધિમગ્નોઽજનિ ॥ ૯૭॥

પર્યાવૃત્ય પશૂનશેષસખિભિઃ સાકં ત્વયા સ્વીકૃતે
　　ગોપીલોચનપઙ્કજાલિનિચિતે સાયં ગવામધ્વનિ ।
જીયાસુર્દયિતાનનેષુ નિતરાં સાકૂતનૃત્યાકુલાઃ
　　કાલિન્દીસદૃશાઃ સ્મિતેન સુરસાસ્ત્વચ્ચક્ષુષોઃ કાન્તયઃ ॥ ૯૮॥

યો વાચો મનસોઽપિ નૈવ વિષયસ્ત્વં ત્વાં વિધાયાત્મજં
　　યાભ્યઙ્ગસ્નપનાશનપ્રભૃતિભિઃ સંલાલયત્યન્વહમ્ ।
નો દાનેન ન ચેજ્યયા ન તપસા નો સાઙ્ખ્યયોગાદિભિ-
　　ર્યલ્લભ્યં તદવાપ ગોપદયિતા સાઽઽસ્તાં યશોદા મુદે ॥ ૯૯॥

પૂર્ણે દાનપતેર્મનોરથશતૈઃ સાર્ધં પ્રલમ્બારિણા
　　તલ્પે નિન્દિતદુગ્ધસિન્ધુસુષમાસારે ત્વયા સ્વીકૃતે ।
સન્દષ્ટોષ્ઠમુદશ્રુ મર્દિતકરં તચ્ચેષ્ટિતં શૃણ્વતઃ
　　કંસધ્વંસમભીપ્સતો જયતિ તે ભ્રાતા સમં મન્ત્રણા ॥ ૧૦૦॥

યા સંવ્યાપ્ય સુવર્ણભૂધરપદં જાતા ગિરીશાર્ચિતા
　　સ્વચ્છા હંસકવિપ્રિયા કમલમુદ્રામ્ભીર્યમભ્યઞ્ચતિ ।
યેયં કૃષ્ણપદાબ્જભક્તિવસુધાપાતાલમાલમ્બિતા
　　સા તાપં મમ સર્વતઃ પ્રશમયત્વાનન્દમન્દાકિની ॥ ૧૦૧॥

યે પાણ્ડિત્યકવિત્વસૂનુધરણીધર્માર્થકામાણિમા-
　　દીશિત્વેન્દ્રપદાપ્તિમોક્ષમથવા વાઞ્છન્તિ ભક્તિં હરૌ ।
સમ્ભૂતાં મધુસૂદનપ્રપદતઃ સન્તો ભજન્ત્વાદરા-
　　ત્તે સંસારદવાગ્નિતાપશમનીમાનન્દમન્દાકિનીમ્ ॥ ૧૦૨॥

ઇતિ શ્રીમન્નન્દનન્દનપદદ્વન્દ્વસમુદઞ્ચન્નખચન્દ્રચન્દ્રિકાચય-
દત્તચિત્તચકોરશ્રીમધુસૂદનસરસ્વતીવિરચિતાનન્દમન્દાકિની સમ્પૂર્ણા ॥

Encoded and proofread by Sunder Hattangadi
Proofread by PSA Easwaran

---

*Ananda Mandakini*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*